# Sri Guru Vandanam

# ॥ श्रीगुरुवन्दनम् ॥

## श्रीगुरुभ्यो नमः

शङ्कारूपेण मच्चित्तं पङ्कीकृतमभूद्यया ।
किङ्करी यस्य सा माया शङ्कराचार्यमाश्रये ॥

प्रह्लादवरदो देवो यो नृसिंहः परो हरिः ।
नृसिंहोपासकं नित्यं तं नृसिंहगुरुं भजे ॥

श्रीसच्चिदानन्दशिवाभिनव्यनृसिंहभारत्यभिधान् यतीन्द्रान् ।
विद्यानिधीन् मन्त्रनिधीन् सदात्मनिष्ठान् भजे मानवशम्भुरूपान् ॥

सदात्मध्याननिरतं विषयेभ्यः पराङ्मुखम् ।
नौमि शास्त्रेषु निष्णातं चन्द्रशेखरभारतीम् ॥

विवेकिनं महाप्रज्ञं धैर्यौदार्यक्षमानिधिम् ।
सदाभिनवपूर्वं तं विद्यातीर्थगुरुं भजे ॥

अज्ञानां जाह्नवीतीर्थं विद्यातीर्थं विवेकिनाम् ।
सर्वेषां सुखदं तीर्थं भारतीतीर्थमाश्रये ॥

**विद्याविनयसम्पन्नं वीतरागं विवेकिनम् ।**
**वन्दे वेदान्ततत्त्वज्ञं विधुशेखरभारतीम् ॥**

पञ्चाशल्लिपिभिर्विभक्तमुखदोः पन्मध्यवक्षस्थलां
भास्वन्मौलिनिबद्धचन्द्रशकलामापीनतुङ्गस्तनीम् ।
मुद्रामक्षगुणं सुधाढ्यकलशं विद्याञ्च हस्ताम्बुजैः
बिभ्राणां विशदप्रभां त्रिनयनां वाग्देवतामाश्रये ॥

श्रीमत्परमहंस-परिव्राजकाचार्यवर्य-

पदवाक्यप्रमाणपारावारपारीण-

यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाध्यष्टाङ्गयोगानुष्ठाननिष्ठ-

तपश्चक्रवर्ति-अनाद्यविच्छिन्नश्रीशङ्कराचार्यगुरुपरंपराप्राप्त-

षड्दर्शनस्थापनाचार्य-

व्याख्यानसिंहासनाधीश्वर-सकलनिगमागमसारहृदय-सांख्यत्रयप्रतिपादक-

वैदिकमार्गप्रवर्तक-सर्वतन्त्रस्वतन्त्र-आदिराजधानी-विद्यानगरमहाराजधानी-

कर्णाटकसिंहासनप्रतिष्ठापनाचार्य-

श्रीमद्राजाधिराजगुरु-भूमण्डलाचार्य-ऋष्यश्रृङ्गपुरवराधीश्वर-तुङ्गभद्रातीरवासी-

श्रीमद्विद्याशङ्करपादपद्माराधक-

श्रीमज्जगद्गुरु-श्रीमदभिनवविद्यातीर्थमहास्वामिगुरुकरकमलसञ्जात-

श्रीमज्जगद्गुरु-श्रीभारतीतीर्थमहास्वामिनां-**तत्करकमलसञ्जात-**

**श्रीमज्जगद्गुरु-श्रीविधुशेखरभारतीमहास्वामिनां च**

चरणारविन्दयोः साष्टाङ्गप्रणामान् समर्पयामः ॥